# संस्कृत-वार्ता:

**दिनाङ्कः-11.04.2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- अद्य प्रधानमन्त्री नरेन्द्रमोदी वाराणसी नगरस्य मेंहदीगंज क्षेत्रे चतुरशीत्यधिक-अष्टशतोत्तर-त्रिसहस्रकोट्यधिक-रूप्यकाणां चतुश्चत्वारिंशत् परियोजनानां शिलान्यासं विहितवान्।
- विदेशमन्त्री डॉ. जयशंकरः उक्तवान् यत् अमेरिकादेशेन विश्वेन सह आत्मानं कथं योजनीयमिति दृष्टिकोणं मौलिकरूपेण परिवर्तितमस्ति, अथ च अस्य परिणामाः प्रत्येकस्मिन् क्षेत्रे अनुभूयमानाः सन्ति।
- दक्षिणकोरिया-सीरियेति देशाभ्याम् औपचारिकरूपेण कौटनीतिक-सम्बन्धाः पुन: स्थापिता: सन्ति ।
- अमेरिकीय-विदेशमंत्री मार्को रुबियो प्रोक्तवान् यत् ईरानस्य परमाणु कार्यक्रममालक्ष्य परिचर्चायै अमेरिकादेश: श्व: ईरानदेशेन साकं वार्तां करिष्यति।
- आई.पी.एल. इत्याख्यायां क्रिकेट् क्रीडामालिकायाम् अद्य चेन्नईनगरस्य एम.ए. चिदम्बर कीडाङ्गणे चेन्नई-सुपर-किंग्स इति दलस्य साम्मुख्यं सन्ध्यायां सार्धसप्तवादने कोलकाता नाइट्राइडर्स इति दलेन सह भविष्यति।

**<u>प्रधानमन्त्री/मेंहदीगंज</u>**

अद्य प्रधानमन्त्री नरेन्द्रमोदी वाराणसी नगरस्य मेंहदीगंज क्षेत्रे चतुरशीत्यधिक-अष्टशतोत्तर-त्रिसहस्रकोट्यधिक-रूप्यकाणां चतुश्चत्वारिंशत् परियोजनानां शिलान्यासं विहितवान्। एतासु परियोजनासु मार्गसंरचना, विद्युत्, शिक्षा, पर्यटनं चेति क्षेत्राणां विकासः सम्मिलितो वर्तते। यस्योद्देश्यं प्रदेशस्य समग्रप्रगतेः प्रवर्तनं, संवर्धनञ्च वर्तते। जनसभां सम्बोधयता प्रधानमन्त्रिणा उक्तं यत् अधुना काशीति नगरी न केवलं प्राचीनतायाः प्रतीकभूतास्ति, अपितु विकासस्य आदर्शभूताप्यस्ति। सः नगरस्य द्रुतविकासस्य प्रशंसाम् कुर्वन् प्रोक्तवान् यत् नागरिकसुविधासु उन्नतविकासेन सह धार्मिकपर्यटनोन्नयनेन चैतत् प्राचीननगरं आधुनिकनगरीय-केन्द्रत्वेन परिवर्तितमस्ति।

प्रधानमन्त्री नरेन्द्रमोदी अद्य मध्यप्रदेशस्य अशोकनगर जनपदे संप्राप्तः। सः गुरुजीमहाराजमन्दिरे प्रार्थनां विहितवान्। तत्र सः ईसागढ़क्षेत्रे श्री-आनंद-धाम-मन्दिर-सङ्कुलस्य अपि दर्शनं अकरोत्। मध्यप्रदेशस्य मुख्यमन्त्री डॉ. मोहन यादवः प्रोक्तवान् यत् राज्यस्य जनाः प्रधानमन्त्रिणः स्वागतं कर्तुं उत्सुकाः आसन्।

**<u>जयशङ्कर / अभियान्त्रिकी</u>**

विदेशमन्त्री डॉ. जयशंकरः उक्तवान् यत् अमेरिकादेशेन विश्वेन सह आत्मानं कथं योजनीयमिति दृष्टिकोणं मौलिकरूपेण परिवर्तितमस्ति, अथ च अस्य परिणामाः प्रत्येकस्मिन् क्षेत्रे अनुभूयमानाः सन्ति। डॉ. जयशङ्करः नवदिल्ल्यां समायोज्यमाने ग्लोबल-टेक-सम्मिटाख्ये वैश्विकाभियान्त्रिके सम्मेलने अद्य प्रातः भाषमाणः आसीत्।

**<u>दक्षिणकोरिया-सीरिया/कूटनीतिकसम्बन्धा:</u>**

दक्षिणकोरिया-सीरियेति देशाभ्याम् औपचारिकरूपेण कौटनीतिकसम्बन्धाः स्थापिता: सन्ति। यद्धि सीरियादेशस्य राष्ट्रपते: अहमद्-अल-शरा इत्येतस्य सङ्क्रमणकालीनाय प्रशासनाय महत्वपूर्णमस्तीति विशेषज्ञानां मतिः। ह्य: दमिश्क इत्यत्र दक्षिणकोरियादेशस्य विदेशमन्त्री चो-ताए- युल् सीरियादेशस्य च विदेशमन्त्री असद-अल-शैबानी इत्येतयोर्मध्ये कौटनीतिक सम्बन्धाः औपचारिकरूपेण पुन: स्थापिताः ।

राष्ट्रपतिः द्रौपदी मुर्मुः इत्यस्याः स्लोवाकिया देशस्य यात्रा सफलतया संजातास्ति। तस्याः एषा यात्रा अनेककारणात् ऐतिहासिकी आसीत् । प्रायः त्रिंशत् वर्षाणां अन्तरालस्य अनन्तरं यात्रैषा अभवत्। राष्ट्रपतिः द्रौपदी मुर्मुः स्लोवाकिया देशस्य-राष्ट्रपतिना पीटर-पेलेग्रिनीवर्येण, प्रधानमन्त्रिणा -राबर्ट्-फिको वर्येण च साकं मिलितवती। सममेव प्रतिनिधिमण्डल-स्तरीया वार्ता च अभवत्। अस्मिन् यात्रावधौ द्वे सन्धिपत्रे अपि हस्ताक्षरिते। राष्ट्रपतिः नित्रानगरस्य टाटा-जगुआर-लैण्ड-रोवर-निर्माण-संयंत्रस्यापि यात्रां विहितवती। नित्रानगरस्थ कॉन्स्टेंटायिन द फिलॉसफर विश्वविद्यालयेन राष्ट्रपतिः द्रौपदी मुर्मुं मानद-डॉक्टरेट् इति उपाधिना विभूषिता। राष्ट्रपतिः स्लोवाकिया-भारत-वैश्विक-मञ्चं अपि सम्बोधितवती। स्लोवाकिया देशस्य राष्ट्रपतिः संयुक्त-राष्ट्र-सुरक्षा-परिषदः स्थायी-सदस्यतायै स्लोवाकिया देशस्य समर्थनं पुनः प्रतिपादितवान्। अपरतः राष्ट्रपतिः मुर्मुः स्लोवाकियायाः एतत् पदक्षेपस्य प्रशंसाम् अकरोत् । इयं यात्रा वाहनस्य, रेलमार्गस्य, जैव-ईंधनस्य चेत्येषु क्षेत्रेषु द्वयोः देशयोः मध्ये व्यावसायिक सम्बन्धान् अधिकं गतिं प्रददाति। राष्ट्रपतिः द्रौपदी मुर्मुः नव दिल्लीनगरं प्रति प्रस्थानात् पूर्वं ब्रातिस्लावा, स्लोवाकिया उभयोः देशयोः भारतीय-व्यापार-प्रतिनिधिमण्डलस्य सदस्यैः सह संवादसत्रे उपस्थिता आसीत्।

**अमरीकी-ईरान परमाणु**

अमेरिकीय विदेशमंत्री मार्को रुबियो प्रोक्तवान् यत् ईरानस्य परमाणु कार्यक्रममालक्ष्य परिचर्चायै अमेरिकादेश: श्व: ईरानदेशेन साकं वार्तां करिष्यति। अमेरिकादेशस्य विशेष-प्रतिनिधिः स्टीव विटकॉफ, एकः वरिष्ठः ईरानदेशस्य नेता चोभयोः मध्ये परिचर्चा अस्य सप्ताहस्य अन्ते ओमानदेशे संजायमाना वर्तते। ईरान अमेरिकयोः देशयोः प्रतिनिधिमंडलसदस्याः श्वः मध्याह्नात् प्राक् ओमानस्य मस्कट राजधान्यां संप्राप्स्यन्ते। सममेव ओमानस्य विदेशमंत्रिणं समं उपवेशनानंतरं ते अमेरिकीय सदस्यैः सह वार्तां करिष्यन्ति।

**इटलीभारतयोः व्यापारघट्टः**

वाणिज्योद्योगमन्त्रिणा पीयूषगोयलेन प्रोक्तं यत् भारतदेश: यूरोपीयसङ्घेन सह मुक्तवाणिज्यिक- सम्बन्धान् वाञ्छतीति। सः अद्य नवदिल्ल्यां इटली-इण्डिया बिजनेस, साईंस एण्ड टेक्नोलॉजी फोरम इत्याख्ये इटलीभारतयोराधुनिक-विषयसम्बद्धे सम्मेलने भाषमाणः आसीत् । श्रीगोयलः अवोचत् यत् अस्य मञ्चस्य उद्देश्यमस्ति यत् इटलीभारतयोः व्यापारिक-सङ्घटनैः सह पारस्परिक सहयोगाभिवर्धनमिति।

**जम्मूकश्मीरे आततायिहतः**

जम्मूकश्मीरस्य किश्तवाड़ इति जनपदे सुरक्षाबलानां संयुक्तदलेन एकस्मिन् सङ्घट्टे एकः आततायी मारितः। अस्मत्वार्ता-हरेण सूचना दत्ता यत् गुप्त- सूचनानुसारं बुधवासरे किश्तवाड़-जनपदस्य चतरू-वनेति क्षेत्रे संयुक्तरूपेण अन्वेषणाभियानं सुरक्षाबलैः प्रचालितम्। अवसरेऽस्मिन् आततायिना गोलिकाभिः आक्रमणारब्धः, तदनन्तरं प्रत्युत्तरात्मकायां प्रक्रियायां क्रूरकर्मैषः व्यापादितः। सम्प्रत्यपि तत्र अन्वेषणाभियानं प्रचाल्यते, अन्याश्च सूचनाः प्रतीक्ष्यन्ते ।

**क्रीडावार्तासु**

आई.पी.एल. इत्याख्यायां क्रिकेट् क्रीडामालिकायाम् अद्य चेन्नईनगरस्य एम. ए. चिदम्बरं क्रीडाङ्गणे चेन्नई-सुपर-किंग्स इति दलस्य साम्मुख्यं सन्ध्यायां सार्धसप्तवादने कोलकाता नाइट्राइडर्स इति दलेन सह भविष्यति । एतन्मध्ये रितुराजगायकवाड़ इत्यस्य स्थाने महेन्द्रसिंहधोनीति प्राक्तनः भारतीय दलनायकः इतः परम् चेन्नई-सुपर-किंग्स् इति दलस्य नायकत्वं निर्वहनं करिष्यति।

**॥ इति वार्ताः ॥**